# 8

# ALL INDIA SANSKRIT ELOCUTION CONTEST

## OBJECTIVE

The Objectives/aims of this tough contest are:

- To revive the tradition as well as to sharpen memory of student.
- To protect and preserve Sanskrit Shastras through traditional methods
- To encourage young students from all over the country to participate in such contests to showcase their talents especially in Shastric texts through traditional and modern methods.

# 8. All India Sanskrit Elocution Contest

## 8.1 Introduction

Up to the year 2022-23, 59 All India Elocution Contests have been conducted. 60th contest will be conducted in the month of January/February 2023. The nature of the contest is taken from ancient tradition of Shastra Shikshan Paddhati of India where student has to have the whole text with its commentary in his memory and is expected to nature and explains from the point revealed by a "Swarna Shalaka". The University organizes an All India Sanskrit Elocution Contest every year in different parts of the country to encourage traditional Sanskrit students in extempore speech in Shastric Sanskrit language.

## 8.2 Objective

(i) The aim of this tough contest is to revive the tradition as well as to sharpen memory of student.
(ii) For protection and preservation of Sanskrit Shastras through traditional methods
(iii) Young students from all over the country are encouraged to participate in such contests to showcase their talents especially in Shastric texts through traditional and modern methods.

## 8.3 Scheme Monitoring Guidelines

- Contest is being organized in the *Shastras* viz. *Vyakarana*, *Mimamsa*, *Vedanta*, *Nyaya*, *Sankhyayoga*, *Dharmashastra*, *Jyotisha* and *Sahitya* followed by *Shlokantyakshri* and *Samasyapurti*.
- Mathematic texts and scientific text of Sanskrit is also added for ShalakaPariksha and Ancient Mathematic Problem solution contest.
- In addition, Shalaka Pariksha in Vyakarana, Nyaya and Sahitya is also organized during the contest.
- Six (6) new competitions in different Streams of Indian Knowledge System have also been added in the following competitions under the scheme
    - Bhashana Spardha(02),
    - Shalaka Pareeksha (03) and
    - Kanthapatha Spardha (01)
- There may be some states or places where sources are not available for students to get traditional knowledge. The CSU may organize and offer those students for Shastra Training at its Campuses.
- The CSU may also start Sanskrit Olympiad/Hackathon under this Scheme.

## 8.4 Awards and Recognitions

- Considering the importance of the Shalaka Pareeksha & Shastratha Vichara competitions, winners will be awarded Rs.25,000/- for 1st position, Rs.20,000/- for 2nd position, Rs 15,000/- for 3rd position and Rs.5,000/- for Vishista Shreni.
- In addition in Shastratha Vichara competition who are qualified first round they will be awarded Rs.5,000/-
- In competitions of Bhashana Spardha and Kanthapatha who will obtain 1st position they will be awarded Rs.12,000/-, for2nd position award prize will be Rs.8,000/-, for 3rd position award prize will be Rs.5,000/- and for Vishista Shreni award prize will be Rs.2,500/-

## 8.5 Subject and Guidelines

In every year subject and guidelines will be released by the University in the website of the CSU i.e. www.sanskrit.nic.in.

## 8.6 Age Limit

Maximum age limit for all Kanthapada competitions will be 21 Years and age limit for other competitions will be 26 years as on 1st January in every year.

## 8.7 How to apply

The online applications will be available in the website of the CSU as per schedule of the announcement. The first round will be conducted at various states. The candidates, who will secure first positions in state level competitions, be eligible for All India Level Competitions.

## 8.8 Facilities to be provided to the participants

All participants are given TA and DA facilities for participation at state and all India level for the competitions by the University as per rules.

## 8.9 Methodologies of the competition

### 8.9.1 शलाकापरीक्षा-विधानम्

#### 8.9.1.1 स्पर्धालोः (अध्येतुः) कर्तव्यम्–

शलाकास्पर्धायां भागग्रहणचिकीर्षुणा स्पर्धालुना निर्दिष्टशास्त्रस्य निर्दिष्ट-ग्रन्थभागस्य समग्रतया (न तु अंशतः) अध्ययनं कार्यम्। स्पर्धालुः (अध्येता) ग्रन्थस्य निर्दिष्टभागस्य सर्वाः पङ्क्तीः कण्ठस्थीकुर्यात्, ग्रन्थपङ्क्तीनां विशदं व्याख्यानं कर्तुं सामर्थ्यं सम्पादयेत्, निर्दिष्टे ग्रन्थभागे विद्यमानविषयेषु गहनशास्त्रचर्चां कर्तुमपि कौशलं सम्पादयेत्। एतदभ्यन्तरे, राज्यस्तरीयस्पर्धार्थं नामाङ्कनमपि समये कारणीयम् इति न विस्मरेत्।

**8.9.1.2 परीक्षाविधानम् –**

अखिलभारतीयायां, राज्यस्तरीयायां च शलाकापरीक्षायां निर्दिष्टग्रन्थम् अधीतवतः प्रत्येकं स्पर्धालोः परीक्षणं त्रिधा क्रियते।

1.स्मृतिबल/धारणाशक्ति-परीक्षणम्

2.ग्रन्थपङ्क्तेः व्याख्यानसामर्थ्यपरीक्षणम्

3.विशिष्टज्ञानपरीक्षणम्/शास्त्रचर्चा/गाढपरीक्षणम्

**प्रथमः घट्टः (स्मृतिबल/धारणाशक्ति-परीक्षणम्)-**

परीक्षकैः शलाकया उद्धृतात् स्थानात् एका ग्रन्थपङ्क्तिः उच्चार्यते। ततः आरभ्य छात्रेण अग्रिमपङ्क्तयः श्रावणीयाः (परीक्षकाः यावत् श्रोतुमिच्छन्ति तावत्पर्यन्तम्)परीक्षकेषु एकैकः अपि एकस्य छात्रस्य एतादृशपरीक्षणम् अन्यूनं त्रिवारं कुर्यात्। स्पर्धार्थिसंख्याम्, समयं च अनुसृत्य परीक्षकाः ततोधिकप्रश्नान् अपि कर्तुमर्हन्ति।परीक्षकैः असकृत् शलाकया एव प्रश्नस्थानानि उद्घाटनीयानि।

**द्वितीयः घट्टः (व्याख्यानसामर्थ्यपरीक्षणम्) -**

परीक्षकैः शलाकया उद्घाटितस्थानात् ग्रन्थपङ्क्तिरेका उच्चार्यते। तस्याः पङ्क्तेः विशदं व्याख्यानं छात्रः कुर्यात्। छात्रस्य एतादृशं परीक्षणं एकैकः अपि परीक्षकः अन्यूनं त्रिवारं कुर्यात्। परीक्षकैः प्रतिवारं शलाकया प्रश्नस्थानानि चेतव्यानि।

**तृतीयः घट्टः (विशेषावगतिपरीक्षणम्/गाढज्ञानपरीक्षणम्) -**

परीक्षकाः निर्धारितग्रन्थभागे विद्यमाने विषये गहनप्रश्नान् कुर्युः। छात्रेण सह शास्त्रचर्चां कुर्युः। छात्रेण प्रदत्तसमाधानमनुसृत्य पुनः प्रश्नान् अपि परीक्षकाः कर्तुमर्हन्ति येन छात्रस्य ग्रन्थावगतेः स्तरः निर्णीतः भवेत्। एकवारं कृत-प्रश्नपुनःप्रश्न-शास्त्रचर्चादीनां समाधानात् परं पुनः द्वितीयवारम् एवमेव प्रश्नपुनःप्रश्नचर्चादिकं भवेत्। अनया रीत्या तृतीयवारं, चतुर्थवारं/पञ्चमवारं च परीक्षकाः प्रश्नान् कुर्युः।त्रिष्वपि घट्टेषु स्पर्धालुना स्वीयं सामर्थ्यं प्रदर्शनीयम्। अन्यथा भागग्रहणम् अपूर्णं भवेत्। परीक्षायाम् उत्तीर्णानाम् एव पुरस्काराय प्रथम/द्वितीय/तृतीय-स्थाननिश्चयः क्रियते।

**8.9.2 शास्त्रार्थविचारस्पर्धाविधानम्**

शास्त्रार्थविचारस्पर्धा युगलवाक्यार्थस्पर्धा वर्तते। भागग्रहणचिकीर्षुभिः स्पर्धालुभिः निर्दिष्टविषये शास्त्रार्थविचारः करणीयः। प्रदत्तविषये कश्चन पूर्वपक्षम् अन्यः सिद्धान्तपक्षं च उपस्थापयेत्। स्ववक्तव्यविषयस्य

शास्त्रान्तरेण सम्बन्धं/साम्यं/भेदं पूर्वपक्षं, सिद्धान्तं च सम्यगवगच्छेयुः। तद्विषये परिचर्चार्थं सिद्धतां कुर्युः। स्पर्धारम्भात् एकघण्टातः पूर्वं सोपानत्रये अपि निर्दिष्टेभ्यः विषयेभ्यः कश्चन विषयविशेषः शास्त्रार्थविषयस्य शीर्षकत्वेन उद्घोष्यते।

अखिलभारतीयायां, राज्यस्तरीयायां च शास्त्रार्थविचारे निर्दिष्टविषयम् अधीतवतः प्रत्येकं स्पर्धालुयुगलस्य परीक्षणं सोपनत्रये क्रियते –

**प्रथमसोपानम् -**

निर्दिष्टेषु विषयेषु कश्चन विषयः स्पर्धार्थं प्रदीयते। तद्विषयमादाय स्पर्धालुयुगलेन शास्त्रार्थः कर्तव्यः। निर्णायकाः विषयोपस्थापनकाले कदापि प्रश्नं कर्तुम् अर्हन्ति। निर्णायकाः स्पर्धाल्वोः विषयप्रतिपादनसामर्थ्यस्य विषयज्ञानस्य च परीक्षणं कुर्युः। तत्र उत्तीर्णं युगलषट्कं द्वितीयसोपानं प्रति आर्हतां प्राप्नोति। अस्मिन् सोपाने प्रतियुगलं विषयोपस्थापनार्थं 15 निमेषाः प्रदीयन्ते।

**द्वितीयसोपानम्**

अत्र पुनः प्रथमसोपाने प्रदत्तं विषयं विहाय निर्दिष्टेषु विषयेषु कश्चन विषयः शास्त्रचर्चार्थं प्रदीयते। तद्विषयमादाय युगलषट्केन शास्त्रार्थः कर्तव्यः । तत्रापि पुनः निर्णायकाः स्पर्धाल्वोः विषयप्रतिपादनसामर्थ्यस्य विषयज्ञानस्य च परीक्षणं कुर्युः। निर्णायकाः विषयोपस्थापनकाले कदापि प्रश्नं कर्तुम् अर्हन्ति। तत्र उत्तीर्णं युगलद्वयं तृतीयसोपानं प्रति गच्छति। अस्मिन् सोपाने प्रतियुगलं विषयोपस्थापनार्थं 15 निमेषाः प्रदीयन्ते।

**तृतीयसोपानम्**

अत्र पुनः प्रथमसोपाने द्वितीयसोपाने च प्रदत्तं विषयं विहाय निर्दिष्टेषु विषयेषु कश्चन विषयः शास्त्रचर्चार्थं प्रदीयते। तद्विषयमादाय युगलद्वयेन शास्त्रार्थः कर्तव्यः । तत्रापि पुनः निर्णायकाः स्पर्धाल्वोः विषयप्रतिपादनसामर्थ्यस्य विषयज्ञानस्य च परीक्षणं कुर्युः। निर्णायकाः विषयोपस्थापनकाले कदापि प्रश्नं कर्तुम् अर्हन्ति। तत्र युगलमेकं प्रथमस्थानं प्राप्नोति। अन्यत् च युगलं द्वितीयस्थानं प्राप्नोति । अस्मिन् सोपाने प्रतियुगलं विषयोपस्थापनार्थं 30 निमेषाः प्रदीयन्ते।